# Shri Krishnaproktam Shiva Stotram

# श्रीकृष्णप्रोक्तं शिवस्तोत्रम्

## Document Information

Text title : Shri Krishnaproktam Shiva Stotram

File name : kRRiShNaproktaMshivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | anuparva | adhyAya 145/37-41||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# श्रीकृष्णप्रोक्तं शिवस्तोत्रम्

स देवेन्द्रश्च वायुश्च सोऽश्विनौ स च विद्युतः ।
स चन्द्रमाः स चेशानः स सूर्यो वरुणश्च सः ॥ ३७॥

स कालः सोऽन्तको मृत्युः स तमो रात्र्यहानि च ।
मासार्धमासा ऋतवः सन्ध्ये संवत्सरश्च सः ॥ ३८॥

स धाता स विधाता च विश्वकर्मा स सर्ववित् ।
नक्षत्राणि दिशश्चैव प्रदिशोऽथ ग्रहास्तथा ।
विश्वमूर्तिरमेयात्मा भगवानमितद्युतिः ॥ ३९॥

एकधा च द्विधा चैव बहुधा च स एव च ।
शतधा सहस्रधा चैव तथा शतसहस्रधा ॥ ४०॥

ईदृशः स महादेवो भूयश्च भगवानतः ।
न हि शक्या गुणा वक्तुमपि वर्षशतैरपि ॥ ४१॥

इति महाभारते अनुशासनपर्वणि १४५ अध्यायान्तर्गतं
श्रीकृष्णप्रोक्तं शिवस्तोत्रं सम्पूर्णम् ।

महाभारत । अनुपर्व । अध्याय १४५/३७-४१ ॥

mahAbhArata . anuparva . adhyAya 145/37-41..

Proofread by PSA Easwaran

*Shri Krishnaproktam Shiva Stotram*
pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*